श्रीकाशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन
परमहंसपरिव्राजकाचार्य-स्वामिश्रीभगवदाचार्येण

प्रणीतेन

माण्डूक्योपनिषत्संस्कारभाष्येण सहिता

अथर्ववेदीयानां ज्ञानप्रतिपादनपरा

माण्डूक्योपनिषत्

मण्डूकनामा कश्चनर्षिविशेषोथर्ववेदीयः। तत्सम्बन्धी कश्चन माडूक्यः। तेनोपदिष्टोपनिषत्तन्नाम्ना प्रसिद्धिं प्राप्ता माण्डूक्योपनिषदिह व्याख्यायते—

ओमित्येतदक्षरम्। इदं सर्वं तस्योपव्याख्यानं भूतं भवद्भविष्यदिति सर्वमोङ्कार एव। यच्चान्यत्त्रिकालातीतं तदप्योङ्कार एव॥ १॥

ओमित्येतदक्षरम्। ओमितिशब्देन प्रतिपाद्यं यत्तदेतदक्षरमविनाशीत्यर्थः। न क्षरतीत्यक्षरम्। यस्य नाशो नास्ति तस्य जन्मनापि न भाव्यम्। यतो नाशो हि जन्मव्याप्यः। यस्य जन्म तस्य नाशो नियत एव। यस्य न जन्म तस्य नो नाशः। अत ओमितिशब्देन यत्प्रतिपाद्यं यद्वा ग्राह्यं तदक्षरमेव। तस्य व्याख्यानस्य सर्वथासम्भवादुपव्याख्यानमाह। भूतमित्यादि। भूतं भवद्भविष्यदितिशब्दत्रितयेन जगति प्रतीयमानं प्रतीतं प्रत्येष्यमाणं च वस्तुजातं ग्रहीतव्यम्। अत एव सर्वशब्दस्य सार्थक्यम्। भूतत्वादीनामपि तत एव सार्थकता। अक्षरस्य त्वक्षरत्वादेव न सर्वशब्दार्थप्रवेशः। यदक्षरं स्यात्तद्विषये भूतभविष्यद्भवदादीनां शब्दानामप्राप्तिरेव। व्याहृतत्वात्। यदक्षरं तन्न हि भूतं भवितुमर्हति। भूतत्वाभावादेव भविष्यत्त्वमपि तस्य निषिध्यते। भवच्छब्देन च वर्तमानता प्रबोध्यते। नन्वक्षरस्य नियतत्वान्मा भूत्तत्र भूतत्वं भविष्यत्त्वं च। वर्तमानत्वं तु स्यादेव। तस्य नित्यवर्तमानत्वात्। भवतु नामाक्षरे वर्तमानत्वं परन्तु भवच्छब्दव्यवहारोत्र। स च शत्रन्तः। शतृप्रत्ययो लट्स्थानिकः। "लटः शतृशानचावप्रथमासमानाधिकरणे" इतिपाणिनिस्मृतिः। वर्तमाने लडिति सूत्रेण वर्तमानेर्थे वर्तमानाद्धातोर्लडिति भवति। तदेवाह भट्टोजिदीक्षितो वर्तमानक्रियावृत्तेर्धातोर्लडिति। धात्वर्थक्रियाया वर्तमानत्वं तु वर्तमानकालवृत्तित्वम्। भू—उत्पदादीनां धातूनामुत्पत्तिरूपोर्थः। तस्य पुत्रो भवत्युत्पद्यत इत्यर्थस्यैव प्रतीतिः। न ह्यक्षरं भवत्युत्पद्यत इति वा प्रयोगः साम्प्रतिकः। सर्वमोङ्कार एव। नन्वोङ्कारशब्देन वेदप्रसिद्धमुपनिषत्प्रसिद्धं च ब्रह्मैव गृह्यतेन्यद्वा किञ्चित्? अत्रोच्यते। अन्यग्रहणे हेत्वभावाद्ब्रह्मैव गृह्यते। यदि ब्रह्मैव गृह्यते तर्हि सर्वमोङ्कार एवेत्युक्ते सर्वस्योत्पन्नस्योत्पत्स्यमानस्योत्पद्यमानस्य च वस्तुजातस्य ब्रह्मत्वं सिध्येत्। तथा च ब्रह्मणोक्षरत्वं सुतरां व्याहन्येत। न ह्युत्पद्यमानं किञ्चिदक्षरं भवद्दृष्टम्। अत्रेदं वक्तव्यम्। अगत्या सर्वमोङ्कार एवेत्यस्य सर्वमोङ्कारात्मकमेवेत्यर्थः। एवं च जातजनिष्यमाणजायमानपदार्थानां ब्रह्मणश्च शरीरशरीरिभावस्वीकारेणात्रोपनिषदर्थो वक्तव्यः। शरीरशरीरिभावमादायोभयोरभिन्नत्वप्रतिपादनस्य बहूनामुपनिषदां स्वभावः। न ह्यत्रैव विराम उपनिषदः। यच्च यत्किमप्यन्यत्त्रिकालातीतं कालाव्यवहार्यं प्रकृत्यादिकमस्ति तदप्योङ्कार एवोङ्कारशरीरमेवेति॥ १॥

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

ओङ्कारः कश्चिद्ब्रह्मव्यतिरिक्तं तत्त्वमित्याशङ्कां शमयितुमाह भगवती श्रुतिः —

सर्वं ह्येतद्ब्रह्म । अयमात्मा ब्रह्म । सोयमात्मा चतुष्पात् ॥ २ ॥

यत्किञ्चिदोङ्कारशब्देनाभिहितं तत्सर्वमेतद्ब्रह्मैव। एवमोङ्कारपदवाच्यत्वं ब्रह्मण एव नान्यस्य कस्यचिदन्यस्य तत्त्वस्येति स्फोरितम् । अद्यावधि जडतत्त्वस्यैव ब्रह्मशरीरत्वं प्रतिपादितम्। अधुना चात्मतत्त्वस्य जीवतत्त्वस्यापि ब्रह्मत्वं प्रतिपाद्यते तच्च शरीरशरीरिभावाङ्गीकारेणैव। अयं प्रतिशरीरमवस्थितो जीवोपि ब्रह्मैव ब्रह्मशरीरमेवेति । स ब्रह्मशरीरभावान्नोयमात्मा चतुष्पाद्भवति चत्वारः पादा यस्य स चतुष्पात् ॥२॥

चतुष्पात्त्वमात्मनो विवृणोति—

जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः ॥ ३ ॥

जागरितं स्थानं यस्य स जागरितस्थानः । जाग्रदवस्थायामेव यस्य व्यापारा भवन्ति स जागरितस्थान उच्यते । बहिःप्रज्ञो बहिरेव बहिर्देश एव बहिर्देशे स्थितेष्वेव पदर्थेषु प्रज्ञा यस्य स बहिःप्रज्ञः । सप्ताङ्गः सप्ताङ्गानि यस्य सः । पञ्च ज्ञानेन्द्रियाणि मनो बुद्धिश्चेत्येतानि सप्ताङ्गानि । अकि अगि गतौ । अङ्गति गति करोति येन तदङ्गम् । एभिरेव सप्तभिरङ्गैरात्मा स्वव्यापारं निर्वाहयति । व्यापारनिर्वहणमेव गतिः । एकोनविंशतिमुख एकोनविंशतिर्मुखानि यस्य सः । शुभं शुभतरं शुभतमं चेति त्रीणि कर्माणि । अशुभमशुभतरमशुभतमं चेति त्रीणि । अशुभमिश्रितं शुभमशुभमिश्रितं शुभतरमशुभमिश्रितं शुभतमं चेति त्रीणि । एतान्येव नव कर्माण्यल्पबहुत्वभेदादष्टादशत्वं भजन्ति । ज्ञानं चेत्येकोनविंशतिः । एतेषां मुखकल्पना तु प्राधान्यहेतुना । न हि जीवानां शुभाशुभयोनिसम्पादने कश्चनान्यो हेतुः कर्मान्तरेण । अतो मुख्यत्वादेतेषां कर्मणां मुखत्वं विज्ञेयम् । स्थूलभुक् स्थूलान्बहिः प्रतीयमानान्पदार्थानेव भुङ्क्त इति स्थूलभुक् । जाग्रदवस्थायां स्थूलपदार्थानामेवोपयोगः । वैश्वानरो विश्वानि सर्वाणि वस्तूनि नयति स्वोपयोगाय गृह्णातीति विश्वानरः । नृ नये । विश्वानर एव वैश्वानरः । एतत्षट्कं पादत्वेन व्यवह्रियते । तथा चायं प्रथमः पादस्तस्यात्मनः । पद्यते प्राप्यते येन स पादः ॥३॥

इति प्रथमः पादः

स्वप्नस्थानोन्तःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः ॥ ४ ॥

द्वितीयं पादं विवृणोति । स्वप्नः स्थानं पदार्थभोगादेर्यस्य स स्वप्नस्थानः । अन्तःप्रज्ञोन्तरेव प्रज्ञा प्रतीतिर्यस्य सः । स्वप्नावस्थायां सर्वेषां पदार्थानां भोगजातानामन्तरेव प्रतीतिर्भवतीति सोन्तःप्रज्ञ इत्युच्यते । प्रविविक्तभुक् । विचिर् पृथग्भावे । अत्यन्तं पृथग्भूतमेव पूर्वानुभूतं स्वप्नं पदार्थं भोगं वा भुङ्क्त इति प्रविविक्तभुक् । सप्तांगं विवृतम् । एकोनविंशतिमुखश्चोक्तार्थः ॥४॥

तृतीयं पादं विवृणोति

यत्र सुप्तो न कञ्चन कामं कामयते न कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानन्दमयो ह्यानन्दभुक् चेतोमुखः प्राज्ञस्तृतीयः पादः ॥ ५ ॥

यत्र यस्यामवस्थायां सुप्तः सन्न कञ्चन कामं कामयते न च कञ्चन स्वप्नं पश्यति तत्सुषुप्तम् । सावस्था सुषुप्तेत्युच्यते । सुप्तः सन्न कंचन स्वप्नं पश्यतोत्युक्त्या सुप्तसुषुप्तयोर्भेदोवगमितः । स्वाप इति सुषुप्तेः पूर्वावस्था । पूर्वावस्थाबोधनमन्तरेण न परावस्था सम्यग्बोधयितव्या भवतीति सुप्तः सन्नित्यगत्या वादः । एकोभूतो निश्चेष्ट इव प्रतीयमानः । सुस्थिर इति भावः । प्रज्ञानघनः प्रज्ञानं घनं घनीभूतं स्थिरतमं भूतं यस्य स प्रज्ञानघनः । सुषुप्तौ मनसः स्थैर्यात्तस्यैव च सकलज्ञानसाधनत्वात्तस्य च क्रियाशून्यत्वात्प्रज्ञानं घनीभूतं भवति । प्रज्ञानघन एवेत्यत्रैवकारात्सर्वविधज्ञानप्रसरनिरोध उक्तः । अत एवानन्दमयः । यावच्चेतसो न भवति स्थैर्यावाप्तिस्तावदतिदूरे तिष्ठत्यानन्दः । प्राप्ते च स्थिरत्वे स आनन्दमयो भवति । प्राचुर्ये मयट् । आनन्दभुक् च भवति । ननु पूर्वमानन्दमय इत्युक्तमत्र चानन्दभुगित्युच्यते । सम्पन्न एव पूर्वापरविरोधः । न विरोधः । आनन्दमयत्वादेवानन्दभुगिव प्रतीयते इति तात्पर्यम् । अन्यथानन्दभोगाय

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

कस्यापि साधनस्य सुषुप्तावभावाद्भुजेर्वैयर्थ्यमेव स्यात्। चेतोमुखः। चिती संज्ञाने। चेतः संज्ञानमेव मुखं प्रधानं यस्य स चेतोमुखः। सुषुप्तौ चेतः केवलं तिष्ठति न तु विशिष्टं शबलितं वा बाह्यज्ञानेन। अत एव प्राज्ञः प्रकृष्टज्ञानः। ज्ञाने प्राकर्ष्यं च स्वरूपभूतज्ञानमादाय। तदानीं केवलं स्वरूपभूतं ज्ञानं तिष्ठति न तु घटपटादिज्ञानम् ॥५॥

एष सर्वेश्वर एष सर्वज्ञ एषोन्तर्याम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम् ॥ ६ ॥

एष हि प्राज्ञः सर्वेश्वरः सर्वेषां वस्तूनामीशिता। एष एव सर्वज्ञः। एष एवान्तर्यामी अन्तःस्थो भूत्वान्तःस्थित एवेति भूत्वा वा सर्वेषां नियन्ता। एष योनिर्मूलं कारणं सर्वस्य जगतः। भूतानां प्रभव उत्पादकोप्ययौ विनाशकश्चाप्येष एव। अयं भावः। 'ब्रह्मणश्चातुर्विध्यं चतुष्पादितिकथनेन व्यञ्जितम्। तच्च चातुर्विध्यं न स्वरूपतः, क्रियाविशेषादेवावगन्तव्यम्। एकमेव ब्रह्म चतुर्विधमिव प्रतीयते चतुर्विधक्रियोपसंहारात्। प्रथमेन द्वितीयेन च पादेन ब्रह्मणो जीवावस्थोक्ता। तृतीयेन पादेन जीवावस्थानिवर्तनपूर्वकतृतीयावस्था प्रोक्ता। इयमेवेश्वरावस्था। अत एवानन्दमयोप्यानन्दभुग्भवति चेतोमुखोपि प्राज्ञो भवति। एकीभूत इत्यस्याप्यत्रैव तात्पर्यम्। जागरितस्वप्नावस्थयोस्तस्य स्वभावादेवानेकविधक्रियासम्पादनादनैक्यं प्रतीयमानमत्रैकीभूतमिव भवति। सर्वक्रियाकलापस्यात्र प्रशमनात्।

इति माण्डूक्योपनिषदि प्रथमः खण्डः

अथ माण्डूक्योपनिषदि

द्वितीयः खण्डः

नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम्। अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्म्यप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते। स आत्मा। स विज्ञेयः ॥१॥

इदानीं शुद्धं ब्रह्मोपलक्षयति। तन्नान्तःप्रज्ञं न बहिष्प्रज्ञं नोभयतःप्रज्ञम्। एतेन विश्वतैजसात्मनोर्निराकृतिर्वेदितव्या। न प्रज्ञानघनं न प्रज्ञमप्रज्ञमपि न। अदृष्टं केनापि कथमपि न दृष्टम्। अव्यवहार्यं व्यवहारायोग्यम्। दुःखनिवर्तनसुखप्रवर्तनादिव्यवहारायोग्यमितिभावः। अग्राह्यं न कथमपि ग्राह्यम्। अलक्षणं कथमपि लक्षयितुमयोग्यम्। अचिन्त्यं चिन्तनानर्हम्। मनोव्यवहारायोग्यमितिभावः। अव्यपदेश्यं दीननाथाशरणशरणपापोद्धारकेत्यादिशब्दैरशब्द्यम्। व्यपदेशः शब्दप्रयोगः। केनापि शब्देन न तत्प्रत्याय्यम्। विरुद्धानुष्ठानमपि व्यपदेशशब्दार्थो भवति परं नात्रायमर्थो ग्राह्यः। ऐकात्म्यप्रत्ययसारम् ऐकात्म्येत्यत्र स्वार्थे ष्यञ्। एकश्चासावात्मा चेत्येकात्मा। स एवैकात्म्यम्। ऐकात्म्यस्य प्रत्ययो ज्ञानमैकात्म्यप्रत्ययः। तादृक्प्रत्यय एव सारो यत्र तदैकात्म्यप्रत्ययसारम्। एकमेव तद्ब्रह्म न द्वितीयं न वा तृतीयम्। अथर्ववेदीया ह्येषोपनिषत् अथर्ववेदे ब्रह्मणो द्वितीयत्वादि शब्देनैव निरस्तम्।

प्रपञ्चोपशमं सर्वेषां प्रपञ्चानामुपशमो यत्र। व्यधिकरणबहुव्रीहिः। शिवं शेते वसति सर्वदा प्रलयकाले वा जगद्यत्र तच्छिवम्। न हि तत्र जागरिताद्यवस्थाप्रतिपादितधर्मा उद्भवन्तीति तच्छिवमित्युक्तम्। अद्वैतं जागरितस्थानस्वप्नस्थानयोः प्रथमद्वितीयपादयोर्न सर्वथा पार्थक्यम्। अत एवोभयोः सम्मेलनेन तद्द्वयमप्येकमेव। द्वितीयं च तृतीयपादोक्तः प्राज्ञः।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

द्वयोर्भावो द्विता। द्वितैव द्वैतम्। स्वार्थेण्। त द्वैतम-द्वैतम्। इदमेव गणनया चतुर्थं मन्यन्तेथर्ववेदीया विद्वांसः। इत्थंभूतः स आत्मास्ति। स चैव विज्ञेयः। अत्रेदमवधेयम्–अनयोपनिषदात्मतत्वस्य त्रैविध्यं स्वीक्रियते। जीवतत्त्वमीश्वरतत्त्वं ब्रह्मतत्त्वं चेति। प्रथमद्वितीयपादाभ्यां जीवतत्त्वम्, तृतीयेनेश्वरतत्त्वं चतुर्थेन ब्रह्मतत्त्वमिति॥

इति माण्डूक्योपनिषदि द्वितीयः खण्डः

अथ माण्डूक्योपनिषदि

तृतीयः खण्डः

ओङ्कारप्रतिपाद्यस्यात्मनो विश्वादिरूपचतुष्टयमुक्तम्। इदानीं तेषां रूपाणां प्रणवप्रतिपाद्यत्वं वक्तुमाह–

सोयमात्माध्यक्षरमोङ्कारोधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकार इति॥ १॥

ओङ्कारशब्दव्याख्यानेन प्रतिपादितस्यात्मनो विषये किञ्चिद्विशिष्टं वदति सोयमात्मेत्यादिना। सोयमात्माध्यक्षरम्। अक्षरे परमात्मनि स्थित इति शेषः। स परमात्मैवोङ्कारः। स चाधिमात्रं तिसृष्वकारोकारमकारादिषु मात्रासु स्थितम्। स्थितेः प्रकारस्तूक्त एव। तिसृभिर्मात्राभिः प्रतिपाद्य ओङ्कार इति भावः। मात्राशब्दस्य विवक्षितमर्थमाह पादा मात्राः। अकार इति प्रथमः पादः। उकार इति द्वितीयः पादः। मकार इति तृतीयः पादः। एते पादा एव मात्रा मात्राशब्दाभिलप्याः। एवं च मात्रा अपि पादशब्दाभिलप्याः। कास्ता मात्राः के वा ते पादा इत्याह अकार उकारो मकार इति। नात्र मात्राशब्देन वैयाकरणानां छन्दोविदां च गृहे प्रसिद्धा अकारेकारोकाराद्या ग्राह्याः। अन्यथा मकारस्य मात्रात्वं न स्यात्। अतो मात्रा पदमेवात्र। प्रातिलोम्येनाप्युक्तिः पादामात्राणामभेदप्रतिपत्त्यर्था। मात्राशब्दो न रूढः, यौगिको हि सः। अत एव मकारस्यापि मात्रात्वमक्षतम्॥१॥

प्रथमे खण्डे विवृतमपि पुनरुक्तिमुपेक्षमाणा श्रुतिः पुनः स्मारयति फलं च श्रावयति—

जागरितस्थानो वैश्वानरोकारः प्रथमा मात्रा। आप्तेरादिमत्त्वाद्वावाप्नोति ह वै सर्वान् कामानादिश्च भवति य एवं वेद॥ २॥

अत्राकारं विवृणोति। आप्लृ व्याप्तौ। अस्मादेव धातोरकारो निष्पाद्यते। आप्नोतेरौणादिको डः प्रत्ययः। डित्वाट्टिलोपः। सर्वान्कामानाप्नोति आपयति वा सोः। किं च यथोमित्यत्राकार आदिर्भवति तथैव अकारार्थमनुभवन्नप्यादिर्भवति। एवं वैश्वानरोपि ओम्प्रतिपाद्यं प्रथमं तत्त्वं जीव इति। आदिर्भवतीत्यस्य वेत्तृणां श्रेष्ठो भवतीत्यर्थः॥ २॥

उकारार्थमुकारं च विवृणोति—

स्वप्नस्थानस्तैजसः। उकारो द्वितीया मात्रा। उत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिम्। समानश्च भवति। नास्याब्रह्मवित्कुले भवति य एवं वेद॥ ३॥

द्वितीयमात्राभूतमुकारं साधयति प्रशंसति च। उपसर्गाणां धात्वर्थव्यञ्जकत्वमितिरीत्योत्कर्षणमेव कृषधातोरर्थः। उत्कर्षति ह वा ज्ञानसन्ततिम्। उत्कर्षस्योकारो गृहीतः। अर्थस्तु समूहस्यैव। अन्येनापि

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

प्रकारेणोकारं साधयति—उभयत्वाद्वा। उभयत्वादित्यस्य द्वितीयत्वादित्यर्थः। परमर्थे न तात्पर्यम्। उकारो द्वितीया मात्रेति तस्या उभयत्वं द्वितीयत्वमित्यर्थः। कथं चिदुकारः स्वाध इति क्लिष्टेन पथानुधावनम्। उत्कर्षतेरुकारसिद्धिर्मुख्येति मत्वाह—ज्ञानसन्ततिमुत्कर्षत्युकार इति। समानः सप्रतिष्ठश्च भवति। य एवं वेद तस्य जन्माब्रह्मवित्कुले न भवति ॥३॥

सुषुप्तस्थानः प्राज्ञोमकारस्तृतीया मात्रा मितेरपीतेर्वो मिनोति ह वा इदं सर्वम्। अपीतिश्च भवति य एवं वेद ॥ ४ ॥

तृतीया मात्रा मकाररूपा निरुच्यते। मीञ् हिंसायाम्। मिनोति सर्वं दोषं हिनस्तीति म्। डः प्रत्ययः। टिलोपः। अथवा अपीतेर्वा। अपीतिरप्ययः। अपीतेर्मकारादेशे म् इति। सर्वदोषाणां तस्याप्ययो भवति य एवमोङ्कारार्थं मकारार्थं वा वेद ॥४॥

अमात्रश्चतुर्थोव्यवहार्यः प्रपञ्चोपशमः शिवोद्वैत एवमोङ्कार आत्मैव। संविशत्यात्मनात्मानं य एवं वेद य एवं वेद ॥ ५ ॥

चतुर्थशब्देनेह शब्दप्रकृतिप्रत्ययागोचर ओङ्कारशब्दाभिधेयः परमात्माभिधीयते। स चामात्रो न विद्यते मात्रा यस्मिन्यस्यार्थं वा। अव्यवहार्यः केनापि रूपेण केनापि प्रकारेण केनाप्युपायेन व्यवहर्तुमयोग्यः। यतः सोव्यवहार्यस्ततः प्रपञ्चोपशमः कारणमव्यवहार्यत्वं च कार्यम्। तत्र ब्रह्मणि नास्ति प्रपञ्चस्तत एवाव्यवहार्यम्। स च शिवः कल्याणरूपः शेते सर्वं जगद्यस्मिन्निति वा। अद्वैतो नास्ति द्वैतं यस्मिन् सः। परमार्थत एक एव। चिदचिती तस्याद्वैतत्वं छेत्तुं भेत्तुं वा न समर्थे भवतः। लोके यथा शरीरेण नात्मन एकत्वं भिद्यते विनश्यति तथैव चिदचिच्छरीरेण तस्याद्वैतहानिर्नैव भवतीति भावः। एवं कः? उच्यत ओङ्कार इति। ओङ्कार इत्यस्योङ्कारपदवाच्य इत्यर्थः। स चोङ्कार आत्मैव। शब्दभेदो नार्थभेदः। घटकलशवत्। य एवं तत्वमेवमेतद्वेद स आत्मात्मानमेवात्मना संविशति। इति फलश्रुतिः ॥५॥

इति माण्डूक्योपनिषदि तृतीयः खण्डः

श्रीकाशीपण्डितसभया "पण्डितराजे" त्युपाधिविभूषितेन
परमहंसपरिव्राजकाचर्यस्वामिश्रीभगवदाचार्येण कृतं
माण्डूक्योपनिषत्संस्कारभाष्यं समाप्तम्।

CC-0. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri